शङ्केरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता शासन संमता विश्वप्रिया पाक्षिक

शारदा

संपादकः पं. वसन्त अ. गाडगीळ.

वार्षिकं मूल्यम् रू. २५ * अस्य अङ्कस्य रू. १-२५

भारतीय-सौर-दिनाङ्कः ७ पौष १९०६ वर्षम् २६ अङ्क ७
विक्रम-संवत् २०४१ शनिवासरः २९ डिसेम्बर १९८४
पुणे-डेरवण (चिपळूण) यज्ञ-महोत्सव-विशेषाङ्क- दैनिकम् ५

अद्य शनिवासरे (२९.१२.८४ प्रातः ४

निर्वाचन निर्णये पक्ष बलम्

संसदः स्थान-संख्या	५१५
उद्घोषित-निर्णय-संख्या	२००
इन्दिरा काँग्रेस	१५३
तेलगू देशम्	२१
जनता	६
कम्युनिस्ट (मार्कसिस्ट)	६
काङ्ग्रेस (शरद)	३
भारतीय जनता पक्ष	२
इतरे	९

अष्टम-लोकसभा-निर्वाचने सर्वत्र इन्दिरा-काँग्रेस-विजयः



विजयस्य परंपरा

'सुस्थिरा भवतु लोक-सत्ता'

-'शारदा'कार-प्रेषितः तंत्री-सन्देशः

नवदेहली : महामात्या-राजीव-गान्धी-नेतृत्वेन इन्दिरा काँग्रेस-पक्षेण अष्टम-लोकसभा-निर्वाचने उत्तरप्रदेश स्थानेशु अमेठी स्थानानि जित्वा यद् अभूतपूर्वं नेत्रोद्दीपकं भव्यं च यशः संपादितं तेन विस्मितं जगत्। सर्वे पराभूताः विरोधी-पक्ष-नेतारः किमर्थं जनतया वयम् एतावत् कठोरं दण्डिताः इति पृच्छापराः किंकर्तव्यमूढाः दृश्यन्ते। 'शारदा'कारैः महामात्याः श्री. राजीव गान्धी अभिनन्दन-परं तंत्री-सन्देशं संप्रेष्य जन-विश्वासार्जनेन संप्रति भारतवर्षे सुस्थिरं, निर्मलम् आदर्शं च शासनं सुदृढी भवतु इति शुभाशंसनं प्रकटीकृतम्।

यज्ञ-महोत्सवे सर्वम् अदृष्टपूर्वम् अश्रुतपूर्वं भव्यम्।

डेरवण (चिपळूण- महाराष्ट्र) : आप्रातः आसायं विविध-देवता-नाम्ना जप-मन्त्रानुष्ठानं, दशसु स्थण्डिलेषु अथर्वशीर्षेण, पवमानेन, सौरसूक्तेन, रूद्रवाक्यैः वा हवनं, सायं भोजनोत्तरं विविध-शाखीय-मन्तर-घोषः, ततः प्रा. सुरेश शेवडे - यागाचार्य लक्ष्मीकान्त दीक्षित - पं. पाठकशास्त्री - पं. आठलेकर श्रीपादशास्त्री इत्यादीनां प्रवचन-पदूनां धर्म-विषयकं प्रवचनं रात्रौ च ऐतिहासिक-धार्मिक-चित्रपट-दर्शनम् प्रतिदिनं नियमेन यागानुष्ठान-विषये 'शारदा' दैनिकस्य 'शारदा'कारैः तेषां प्रबन्ध-संपादिकायाः सुधा अर्जुनवाडकर इत्यस्याः सहयोगेन क्रियमाणं रोचकं प्रकाशनम् इति वैविध्यपूर्ण-कार्य-कलापैः महायजञ्-महोत्सवस्य दिनाष्टके तदर्धं दिन-चतुष्टयं निर्विघ्नं सुफलतां गतम्। प्रतिदिनम् आसूर्योदय-सूर्यास्तम् असंख्याः दर्शनार्थिनः मुम्बई-पुणे- सातारा-सोलापूर- कोल्हापूर-मिरज-सांगली-गोमन्तक-प्रभृतिभ्यः नगरेभ्यः डेरवण-ग्रामम् आगच्छन्ति, यज्ञ-नारायणस्य दर्शनेन, वेद-मन्तर-घोष-श्रवणेन, पू. दिगम्बरदासमहाराज -शुभाशीर्वादेन च स्वात्मानं धन्यं मन्यमानाः 'अहो अदृष्टपूर्वम्, अश्रुतपूर्वम्, अननुभूतपूर्वं भव्यं सर्वं सर्वम् इदम्' इति ससंतोषं धन्यतां प्रकटयन्ति।

अद्य शनिवासरे (२९ डिसेम्बर १९८४) सायं. ७ वादन-समये मुम्बई-देववाणी-मन्दिर- संस्थापकेन श्री. श्री. भि. वेलणकर महाभागेन यज्ञ-महोत्सवार्थम् आनीता बालचमूः 'बालरामायणम्' इति नामकं संस्कृतं नृत्यनाट्यं निपुणम् अभिनेष्यन्ति।

अगतिकाःस्मः। क्षन्तव्याः वयम्। कर्गज-मुद्रणसहिती-मूल्यवर्धनात् नूतने षड्विंशति (२६) - तमे (१ नोव्हेंबर १९८४) शारदीये वर्षे

शारदा-मूल्य-वर्धनम्।

मूल्यम्	भारतवर्षे रुप्यकाणि	विदेशेषु अमेरिकन $
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

स्मर्यताम् श्रूयताम् स्मर्यताम्

प्रतिदिनं प्रातः ७.०० सायं ६.१०

संस्कृत-वार्ताः श्रूयन्ताम्। प्रवाचिका - **विजयश्री** - प्रमुखाः आकाशवाणी-संस्कृत-वार्ता-विभाग-रे. चकाः दिवानिशं प्रयत्नशीलाः संस्कृत-प्रसारणस्तर-वर्धनाय साक्षात्कृताः 'शारदा'-कारैः स्वयं राजधानीं दिल्लीं गत्वा। भारतवर्षे सर्वत्र संस्कृत-श्रोतृ-संघस्य (क्लब) स्थापनेन प्रोत्साहनी यास्ते प्रयासाः सर्वैः। स्वाभिप्रायः प्रेष्यतां शारदायै। **संपादकः**

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् २६ अङ्क ७ सौर ८ पौष १९०६ २९ डिसेम्बर १९८४

वार्षिकं मूल्यम् रू. २५ ❀ अस्य अङ्कस्य रू. १-२५

स्मर्यताम् । श्रूयताम् ।। स्मर्यताम्

आ का श वा णी

डॉयशे वेले कलोन (पश्चिम जर्मनी)
प्रतिमासं द्वितीये सोमवासरे रात्रौ ९.२५ तः ९.३७
लघुलहरी ११७६५ , ११७९५ , १५३२० , १७८७५
विषयः जर्मनीदेशे विश्वे च सर्वत्र संस्कृत - वार्ताः
संस्कृत-कार्यक्रम-संचालिका - डॉ. याज्ञसेनी पोपट

'शारदा-दैनिक-वितरण-केन्द्रम्
राजा दीक्षित वृत्तपत्रागारम्
*** चिपळूण (रत्नागिरी) ४१५६०५

नाद-प्रकाश-भक्ति-त्रिवेणी-संगमः

'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ।'
इति भगवद्-वचनेन नाम-जप-संकीर्तन-भजन-महात्म्यं स्वयंस्पष्टम् । नारदीय-वीणा-सनाथा श्रीहरि-संकीर्तन-परंपरा वैशिष्ट्यं महाराष्ट्र-मण्डलस्य । यदा यदा मधुकराः मञ्जु गुञ्जन्ति, वासन्तिके समये प्राप्ते पिकाः पञ्चमं गायं गायं सृष्टिं वा समर्चयन्ति, मयूराः घनगर्जितेन सहैव नृत्यन्तः केकाभिः करुण-स्वरेण कमलापतिं वा स्मारयन्ति तदा तदा तद् मञ्जु गुञ्जनं तत् पिक-पञ्चम-गानं सः करुणः केकारवः, सर्वं सर्वम् इदं नाद-ब्रह्म-साम्राज्यम् अघटित-घटना-पटीयसी माया-महिम-प्रवीणं परमेशं प्रसादयितुम् एव इति नः श्रद्धाः । तदनुगुणम् एव प्रारब्धम् अस्माभिः भजनं संकीर्तनं नामगानं वा 'श्री'सेवायाम। नाद-ब्रह्म-तत्त्वं तत्र सर°रूप्रधानम्। सैव नादलहरी आस्माकीनां हृद्-वीणाम् अपि भगवद्-भक्ति-परां संपादयति। शब्द-गुणकम् आकाशतत्त्वं नाद-लहरी-माध्यमेन मानवं तन्मयतां नयति।

'अग्निमीळे पुरोहितम्।' इति मानवस्य सर्वाद्य-ग्रथित-विचार-रत्नेन परिचायितं मानवाय अग्नितत्त्वं तैजसं वा प्रकाशतत्त्वम्। ध्येयः सदा सवितृ-मण्डल-मध्यवर्ती नारायणः । इति सूर्य-ध्यान-मन्त्ररेण तत् सवितुर्वरेण्यम्' इति गायत्री-मन्त्ररेण वा तदेव ज्योतिर्ब्रह्म प्रकाशतत्त्वं मानव्यस्य समुद्धारकम् अज्ञान-तिमिरान्धता-विनाशन-समर्थम् इति सिद्धम्।

'भक्तिरेव गरीयसी।' इति सर्वश्रेष्ठतां भक्ति-साम्राज्यस्य भागवतोत्तमः परानुग्रहपरायणः महर्षिः श्रीनारदः सिद्धान्तयति। इयं भक्ति-परंपरा एव भारत-भाग्य-भव्यतां सुभूषयति।

डेरवण ग्रामे श्रीशिव समर्थ मन्दिरे समायोजिते ऋक्संहितास्वाहाकारेण सहैव पञ्चायतन-यागानुष्ठान-महोत्सवे मन्त्रघोषेण नादब्रह्म, यज्ञाग्निनारायण शिखा समुत्थितं ज्योतिर्ब्रह्म, यागानुष्ठानं धर्मस्य, श्रीदिगम्बरदास-हृदय-मन्दिरे विराजमानं धर्मस्य, राष्ट्रस्य, वेदविद्याविषये च यद् भक्ति-ब्रह्म इति ब्रह्म-त्रिवेणी-संगम-दर्शनेन अस्मादृशैः ब्रह्मानन्द-त्रिगुणितः यः कश्चन महान् आनन्दः समाधिगतः तेन अनुभाविता महती धन्यता शब्दातीता स्वीयस्य जीवनस्य।

कराले अस्मिन् कलिकाले एतादृशी ब्रह्म-त्रिवेणी प्रयागाग्रे धर्म-भागीरथी गङ्गावत् सर्वत्र सर्वान् पवित्रीकुर्वाणा प्रसरतात् इत्येव भगवन्तं परमेश्वरं प्रार्थयामहे।

नाद-प्रकाश-भक्ति-लहरींचा त्रिवेणी संगम

'माझे भक्त जिथे' (माझे नाम) गातात, तिथेंच माझा निवास' या भगवन्ताच्या वचनाने नामजप, हरिकीर्तन, भजन यांचे महत्व आपोआप स्पष्ट होते. नारदीय वीणेबरोबरच श्रीहरिकीर्तनाची परंपरा हे महाराष्ट्राचे खास वैशिष्ट्य आहे.

भ्रमर जेव्हां मधुर गुंजन करतात, वसन्तऋतूत कोकीळ पंचम गा गाऊन सृष्टीदेवीचे पूजन करतात किंवा घनगर्जनेबरोबर नृत्यसाधना करणारे मयूर करुण केकानी परमेश्वराला आळवू लागतात, तेव्हा ते मञ्जु गुञ्जन, कोकिळाचे ते पञ्चम गान आणि मोराचा करुण केकारव हे सारे नाद ब्रह्माचे साम्राज्य अघटीत घटना पटुतेने घडविण्याची किमया महत्ता असणाऱ्या त्या परम दयाघन प्रभुलाच प्रसन्न करण्यासाठी ती निसर्गाची सेवा आहे अशी आहे आमची श्रद्धा. निसर्गापासून बोध घेऊन आपण मानवानी सुद्धा श्रीपरमेश्वराच्या सेवेसाठी भजन, हरिकीर्तन, नामगान हा मार्ग चोखाळलेला आहे. या सर्व प्रकारात नादब्रह्म हे तत्त्व प्रधान आहे. हीच नाद लहरी आपल्या हृदयवीणेच्या तारा भगवद्भक्तिसाधना म्हणून छेडू लागतात. शब्द हा गुण असणारे आकाशतत्त्व नादलहरीमधून माणसाची त्या परमात्म्याशी तन्मयता साधते.

'अग्निमीळे पुरोहितम्।' हा मानवाचा सर्वप्रथम ग्रन्थबद्ध झालेला विचार. त्यानेच मानवाला अग्नितत्त्वाचे, तेजाचे, प्रकाशाचे अद्भुत दर्शन घडविले. 'ध्येयःसदा .....सवितृमण्डल-मध्यवर्ती-' या सूर्याच्या ध्यान-मन्तराने किंवा 'तत् सवितुर् वरेण्यम्....' या गायत्री मन्तराने हेच ज्योतिर् ब्रह्म, प्रकाशत्व माननवतेचे उद्धारक, अज्ञानाच्या दाट अंधकाराचे 'विनाशास समर्थ असल्याचे सिद्ध केलेले आहे.

'भक्ति हीच सर्वश्रेष्ठ' अशी भक्तीच्या साम्राज्याची सर्वश्रेष्ठता हा भागवतोत्तम परानुग्रहपर अशा नारद महर्षींनी सांगितलेला सिद्धांत आहे. ही भक्तीची परंपराच भारताचे भव्य भाग्य समृद्ध करणारी आहे.

डेरवणच्या श्रीशिव-समर्थ-मंदिरात चालू असणाऱ्या ऋग्वेद स्वाहाकाराबरोबर देवता पंचायतन यागानुष्ठानांत मंत्रघोषाने नादब्रह्म, यज्ञातील अग्निनारायणाच्या ज्वालातून उद्गत असणारे ज्योतिर्ब्रम्ह आणि साऱ्या विराट् आयोजनामागे खडे असणारे पू. दिगम्बरदास महाराज यांच्या हृदयमंदिरात विराजमान असणारे धर्म, राष्ट्र, वेदविद्या यांच्याबद्दलचे भक्तिब्रम्ह यांच्या त्रिवेणी संगमाच्या दर्शनाने आम्हाला झालेला आनंद आणि वाटणारी धन्यता शब्दातीत आहे.

या कठीण कलिकाली अशाच प्रकारच्या ब्रह्म त्रिवेणीच्या संगमातून पुढे गंगेप्रमाणे प्रसन्न सलिला धर्म-भागीरथी सर्वत्र भारतात सर्वांना पवित्र करीत पुढे पुढे अखण्डित प्रवाहशील राहो हीच परमेश्वराचे चरणीं प्रार्थना.

ॐ श्रीपरमात्मने नमः ।

श्रीविष्णुसहस्रनामस्तोत्रम् ।

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥
नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥

वैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ १ ॥

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ३ ॥

भीष्म उवाच

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४ ॥
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५ ॥
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ६ ॥
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७ ॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १० ॥
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११ ॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १२ ॥
यानिनामानिगौणानिविख्यातानिमहात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १३ ॥
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः ॥ १४ ॥
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १५ ॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ १६ ॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ १७ ॥
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ १८ ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ १९ ॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रककुब्धाम पवित्रं मङ्गलं परम् ॥ २० ॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ २१ ॥
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ २२ ॥
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ २३ ॥
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ २४ ॥
वसुर्वसुमनाः सत्यः समात्मासम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मावृषाकृतिः ॥ २५ ॥
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥ २६ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ २७ ॥
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २८ ॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९ ॥
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ ३० ॥
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ ३१ ॥
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ ३२ ॥
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदांपतिः ॥ ३३ ॥
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ ३४ ॥
अमृत्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ३५ ॥
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ ३६ ॥
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ ३७ ॥
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहःसंवर्तको वह्निरनिलो धरणीधरः ॥ ३८ ॥
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ ३९ ॥
असंख्येयोऽप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥ ४० ॥
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ ४१ ॥
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ ४२ ॥
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ४३ ॥
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ४४ ॥
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ४५ ॥
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ४६ ॥
इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः ॥ ४७ ॥
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८ ॥
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९ ॥
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ५० ॥
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ५१ ॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥ ५२ ॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ५३ ॥
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ५४ ॥
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ५५ ॥
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ५६ ॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ५७ ॥
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ५८ ॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ५९ ॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ६० ॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ६१ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ६२ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ६३ ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ६४ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद् गुरुः ॥ ६५ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ६६ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ॥ ६७ ॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ६७ ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ६८ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ६९ ॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१ ॥

वेधाः स्वाङ्गोऽजितःकृष्णो दृढःसंकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ७२ ॥

भगवान्भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यःसहिष्णुर्गतिसत्तमः ॥ ७३ ॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ७४ ॥

त्रिसामा सामगःसाम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमःशान्तो निष्ठाशान्तिपरायणम् ॥७५ ॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ७६ ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ७७ ॥

श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः ।
श्रीधरःश्रीकरःश्रेयःश्रीमाँल्लोकत्रयाश्रयः ॥ ७८ ॥

स्वक्षःस्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्माविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ७९ ॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकःशोकनाशनः ॥ ८० ॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्माविशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ८१ ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ८२ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ॥ ८३ ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८५ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिःस्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ८६ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ८८ ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ८९ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ९० ॥

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१ ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ९२ ॥

अमानी मानदो मान्यो लोकस्वामीत्रिलोकधृक्
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ९३ ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ९४ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५ ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ९६ ॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ९७ ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ९८ ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ९९ ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ १०० ।

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ १०१ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ १०२ ॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ १०३ ॥

भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ १०४ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमोऽयमः ॥ १०५ ॥

सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ १०६ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ १०७ ॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ १०८ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥१०९॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ११० ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ १११ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ११२ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्माविदिशो व्यादिशो दिशः ॥ ११३ ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमोभीमपराक्रमः ॥ ११४ ॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ ११५ ॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ ११६ ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ ११७ ॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ ११८ ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ ११९ ॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १२० ॥

॥ सर्वप्रहरणायुध ॐ नम इति ॥

संपादकः मुद्रकः प्रकाशकः स्वामी पं. वसन्त अनन्त गाडगीळ, बी.ए.बी.एड., साहित्य विशारद (पुणे दूरवाणी ५२१२४), मुद्रण स्थलम शारदा मुद्रण सिद्धि मन्दिरम, पुणे १६, / मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१), प्रकाशन स्थलम् श्रीशिव समर्थ मन्दिरम्, डेरवण (चिपळूण रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६